# Gauri Ashtottarashatanama Stotram

# ગૌર્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Gauri Ashtottarashatanama Stotram 1

File name : gauri108Str.itx

Category : aShTottarashatanAma, devii, pArvatI, stotra, dattAtreyAnandanAtha, devI

Location : doc_devii

Author : Dattatreya

Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Proofread by : Sridhar Seshagiri, PSA Easwaran

Description-comments : Mahatmya Khandam of the Tripura Rahasyam, see corresponding nAmAvalI

Latest update : February 15, 2003, December 8, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 17, 2025

*sanskritdocuments.org*

# ગૌર્યષ્ટોત્તરશતનામસ્તોત્રમ્

દત્તાત્રેયેણ ગૌર્યષ્ટોત્તરશતનામસ્તોત્રોપદેશવર્ણનમ્ ।
અથ ગૌર્યષ્ટોત્તરશતનામસ્તોત્રમ્ ।
ઇતિ શ્રુત્વા કથાં પુણ્યાં ગૌરીવીર્યવિચિત્રિતામ્ ।
અપૃચ્છદ્ભાર્ગવો ભૂયો દત્તાત્રેયં મહામુનિમ્ ॥ ૧॥

ભગવન્નદ્ભુતતમં ગૌર્યા વીર્યમુદાહૃતમ્ ।
શ‍ૃણ્વતો ન હિ મે તૃપ્તિઃ કથાં તે મુખનિઃસૃતામ્ ॥ ૨॥

ગૌર્યા નામાષ્ટશતકં યચ્છચ્યૈ ધિષણો જગૌ ।
તન્મે કથય યચ્છ્રોતું મનો મેઽત્યન્તમુત્સુકમ્ ॥ ૩॥

ભાર્ગવેણેત્થમાપૃષ્ટો યોગિરાડત્રિનન્દનઃ ।
અષ્ટોત્તરશતં નામ્નાં પ્રાહ ગૌર્યા દયાનિધિઃ ॥ ૪॥

જામદગ્ન્ય શ‍ૃણુ સ્તોત્રં ગૌરીનામભિરઙ્કિતમ્ ।
મનોહરં વાઞ્છિતદં મહાઽઽપદ્વિનિવારણમ્ ॥ ૫॥

સ્તોત્રસ્યાઽસ્ય ઋષિઃ પ્રોક્ત અઙ્ગિરાશ્છન્દ ઈરિતઃ ।
અનુષ્ટુપ્ દેવતા ગૌરી આપન્નાશાય યો જપેત્ ॥ ૬॥

હ્રાં હ્રીં ઇત્યાદિ વિન્યસ્ય ધ્યાત્વા સ્તોત્રમુદીરયેત્ ॥

॥ ધ્યાનમ્ ॥

સિંહસંસ્થાં મેચકાભાં કૌસુમ્ભાંશુકશોભિતામ્ ॥ ૭॥

ખડ્ગં ખેટં ત્રિશૂલઞ્ચ મુદ્ગરં બિભ્રતીં કરૈઃ ।
ચન્દ્રચૂડાં ત્રિનયનાં ધ્યાયેત્ગૌરીમભીષ્ટદામ્ ॥ ૮॥

॥ સ્તોત્રમ્ ॥

ૐ ગૌરી ગોજનની વિદ્યા શિવા દેવી મહેશ્વરી ।
નારાયણાઽનુજા નમ્રભૂષણા નુતવૈભવા ॥ ૯॥

ત્રિનેત્રા ત્રિશિખા શમ્ભુસંશ્રયા શશિભૂષણા ।
શૂલહસ્તા શ્રુતધરા શુભદા શુભરૂપિણી ॥ ૧૦॥

ઉમા ભગવતી રાત્રિઃ સોમસૂર્યાઽગ્નિલોચના ।
સોમસૂર્યાત્મતાટઙ્કા સોમસૂર્યકુચદ્વયી ॥ ૧૧॥

અમ્બા અમ્બિકા અમ્બુજધરા અમ્બુરૂપાઽઽપ્યાયિની સ્થિરા ।
શિવપ્રિયા શિવાઙ્કસ્થા શોભના શુમ્ભનાશિની ॥ ૧૨॥

ખડ્ગહસ્તા ખગા ખેટધરા ખાઽચ્છનિભાકૃતિઃ ।
કૌસુમ્ભચેલા કૌસુમ્ભપ્રિયા કુન્દનિભદ્વિજા ॥ ૧૩॥

કાલી કપાલિની ક્રૂરા કરવાલકરા ક્રિયા ।
કામ્યા કુમારી કુટિલા કુમારામ્બા કુલેશ્વરી ॥ ૧૪॥

મૃડાની મૃગશાવાક્ષી મૃદુદેહા મૃગપ્રિયા ।
મૃકણ્ડુપૂજિતા માધ્વીપ્રિયા માતૃગણેડિતા ॥ ૧૫॥

માતૃકા માધવી માદ્યન્માનસા મદિરેક્ષણા ।
મોદરૂપા મોદકરી મુનિધ્યેયા મનોન્મની ॥ ૧૬॥

પર્વતસ્થા પર્વપૂજ્યા પરમા પરમાર્થદા ।
પરાત્પરા પરામર્શમયી પરિણતાખિલા ॥ ૧૭॥

પાશિસેવ્યા પશુપતિપ્રિયા પશુવૃષસ્તુતા ।
પશ્યન્તી પરચિદ્રૂપા પરીવાદહરા પરા ॥ ૧૮॥

સર્વજ્ઞા સર્વરૂપા સા સમ્પત્તિઃ સમ્પદુન્નતા ।
આપન્નિવારિણી ભક્તસુલભા કરુણામયી ॥ ૧૯॥

કલાવતી કલામૂલા કલાકલિતવિગ્રહા ।
ગણસેવ્યા ગણેશાના ગતિર્ગમનવર્જિતા ॥ ૨૦॥

ઈશ્વરીશાનદયિતા શક્તિઃ શમિતપાતકા ।
પીઠગા પીઠિકારૂપા પૃષત્પૂજ્યા પ્રભામયી ॥ ૨૧॥

મહમાયા મતઙ્ગેષ્ટા લોકાલોકા શિવાઙ્ગના ॥

॥ ફલશ્રુતિઃ ॥

એતત્તેઽભિહિતં રામ ! સ્તોત્રમત્યન્તદુર્લભમ્ ॥ ૨૨॥

ગૌર્યષ્ટોત્તરશતનામભિઃ સુમનોહરમ્ ।
આપદમ્ભોધિતરણે સુદૃઢપ્લવરૂપકમ્ ॥ ૨૩॥

એતત્ પ્રપઠતાં નિત્યમાપદો યાન્તિ દૂરતઃ ।
ગૌરીપ્રસાદજનનમાત્મજ્ઞાનપ્રદં નૃણામ્ ॥ ૨૪॥

ભક્ત્યા પ્રપઠતાં પુંસાં સિધ્યત્યખિલમીહિતમ્ ।
અન્તે કૈવલ્યમાપ્નોતિ સત્યં તે ભાર્ગવેરિતમ્ ॥ ૨૫॥

The 108 names of Gauri are as recited by
Lord Dattatreya to Parashurama in the
Mahatmya Khandam of the Tripura Rahasyam.

Encoded by Sridhar Seshagiri seshagir at engineering.sdsu.edu
Proofread by Sridhar Seshagiri, PSA Easwaran

---

*Gauri Ashtottarashatanama Stotram*
pdf was typeset on April 17, 2025

Please send corrections to *sanskrit@cheerful.com*